नं. ५०११

न्याय सिद्धान्त मुक्तावली.

गदाधरी. टीका.

× × ×

पत्र. ४ सं. ×

विषय. न्याय वैशेषिकं

न्यायसिद्धान्तमुक्तावलीटीका गदाधरी

५०१९

5019

श्रीगणपतये नमः चूडामणीति विधूपादानकचूडामणीसाध्यकोटूत्पाश्रयाभिन्नो
ऽवलयवाहुकुपादानकवलुपसाध्यकहूत्पाश्रयाभिन्नलीलागसुतस्तांडवकर्त्रभिन्न
सर्वज्ञाभिन्नभवश्रिकोर्द्धिताभाधापरिच्छेदरूपकारिकावलीकाख्यानरूपग्रंथसमाप्ति
परिपंथिगतदुरितपुंजनाशनरूपमध्योद्देश्यकमापाररूपभजनप्रकारकवक्रमिश्रायविष
यत्वमन्वयबोधः १ निजेति कारिकावलीमित्यत्र द्वितीयार्थतात्पर्यविषयत्वं चिरं राम
तनानामुक्तयस्ताश्च संक्षिप्ता इति कर्मधारयः तत्र संक्षिप्ता इति अत्युक्तानां विस्तृतानां स १
र्थः चिरंतनोक्तयश्चिरंतनसंबंधियुक्तयः विस्तृतशब्दप्रतिपाद्ययुक्तिप्रतिपादका इति

चिरंतनशास्त्रलक्ष्यार्थः अभेदस्तृतीयार्थः विशदीकरवाणि विप्रतिपन्नप्रतिपन्नस्य तथा
प्रतिपन्नस्यासंगतिनिरासपूर्वकयावदर्थप्रकाशानुकूलव्यापारो धात्वर्थः नन्विदमवधारणे
राजीवदयावशंवदः राजीवादिभाषापरिच्छेदतात्पर्यार्थजिज्ञासुबुद्ध्याभाषापरिच्छेदा
र्थज्ञाननिबंधनतुः एवं निराचिकीर्षितस्यावशंवदोधीनः तथा च भाषापरिच्छेदार्थजिज्ञा
सुराजीवादिहृदितुः एवंसानुकूलव्यापारेच्छावदभिन्नोहं विश्वनाथपंचाननः स्वकर्तृक
निर्माणकर्मीभूतकारिकावलीतात्पर्यविषययावदर्थप्रकाशानुकूलविप्रतिपन्नप्रतिप
न्नतथाप्रतिपन्नसंगतिनिरासपूर्वकानुकूलाविस्तृतानुकूलातिविस्तृतचिरंतनोक्तिप्रतिपा
द्ययुक्तिप्रतिपादकवचनाभिन्नाल्पाक्षरसंप्रयोज्यविषयकाभिप्रायवानित्यन्वयबोधः २स

हृद्येति अत्र मुक्ता इव सिद्धान्तास्तासामावलीति तेनोपमितिसमासः सामान्यधर्मोपादानात् वि
स्तुवक्षं स्थलविन्यासानुपयोगाच्च तथाहि मुक्तासदृशसिद्धान्तप्रतिपादकशब्दपरंपरायास्त
2 त्समासेन प्रतीयमानायाविच्छेदरूपतासंभवस्य पत्यकरोधीति शास्त्रानुसारित्वेपि न हृद्याः स्थलाप्य
णास्य प्रयोजनप्रयोजनविशेषाप्रतीतेः प्रमाणाभावाच्चेनोपमालंकारः संभवति ननु परि
णामालंकार एवात्र संभवेदिति प्रसन्नेन दृगञ्जेन वीक्षते मदिरेक्षणोत्पत्त्येक्षणरूपक्रियार्थ
त्वेनाञ्जस्य दृगात्मना परिणामस्य दृगेवाञ्जमिति समासाश्रयणेनैव तथा प्रकृते सिद्धान्तमुक्ता राम
वलीत्यत्र सिद्धान्तशब्दस्य सिद्धान्तमुक्ताप्रतिपादकशब्दसंदर्भपरतया मुक्तावलीशब्दस्य मु २
क्ताहारपरतया सिद्धान्त एव मुक्ता सिद्धान्तमुक्तास्तासामावली सिद्धान्तमुक्तावलीति समासेन

सिद्धांतप्रतिपादकशब्दसंदर्भस्यमुक्ताहारत्वेनपरिणामप्रतीत्याविष्णुवक्षस्थलार्पणक्रिया

निर्वाहादितिचेन्न परिणामः क्रियार्थश्चेद्विषयीविषयात्मनेतिलक्षणावाक्येनयत्रविषयि

णारुप्यमानस्यस्वतोविषयसाध्यक्रियानिर्वाहकत्वे दृगेवाम्बुजमितिविषयात्मनापरिणामः प

रिणामालंकार इतिप्रतीत्यासिद्धांतमुक्तावलीत्यत्रविषयात्मकमुक्तावलीकर्मकविष्णुवक्षस्थ

लार्पणरूपक्रियानिर्वाहार्थंविषयस्यसिद्धांतप्रतिपादकशब्दसंदर्भस्यविषयात्मनापरिणाम

स्यपरिणामलक्षणाक्रांतत्वात् अत्रोच्यते मुक्तानामावलीमुक्तावलीसिद्धांतएवमुक्तावली

सिद्धांतमुक्तावलीत्यवधारणसमासः तथाच मद्दुक्तेत्यादावपिरूपकमेव तथाच द्रव्यप्र

तिपादकाभेदारोपविषयमुक्तवर्णादिमूलपद्मसहिताभिन्नारूपादिगुणप्रतिपादकाभेदारोप

विषयस्तत्र प्रोक्ताभिन्नत्वं प्रमायां सिद्धकर्मप्रतिपादिकाभेदारोपविषयमुख्यार्थलाभप्रयोजकत्वमुत
कर्मज्ञापिकाभिन्नाप्रमासिद्ध्यभावरूपतामान्यविशेषसमवायप्रतिपादकाभेदारोपविषयसो
साहचर्यातिशयसहिताभिन्नाऽभावसंबंधिभावातिरिक्तत्वप्रागभावादिप्रभेदरूपप्रकर्षज्ञापिका
भेदारोपविषयतेऽभावरूपांयकारहितवस्तुप्रकाशसामर्थ्यविशेषोऽवलाभिन्नासमीचीनयुक्ति
प्रतिपादकभेदारोपविषयसमीचीनं संयोगविशेषसहिताभिन्नाविष्णुवक्षस्थलहाभिन्नत्वप्रकारक
विभ्रमनाशपर्यंतविद्युद्ध्यानविषयाभिन्नासिद्धांतप्रतिपादकशब्दसंदर्भाभेदारोपविषयमुख्यार्थावली राम ३
मुख्यतिसंबंधिमनः संबंधिसंतोषानुकूलव्यापारविषयकविभ्रमनाशपर्यंताभिप्रायविषयिभूताद्दशा
कारकान्वयबोधः ३

विशेषणयोरुपादानानुपपत्तिः प्रतिसंधानमयुक्तं विशेषणान्वयाकांक्षा उत्थाप्यतां स्येति भावः

ननु विशेषणयोः सहक्रियया जनितान्वयबोधस्य तुल्यविशेष्यस्य सन्निहितघटितविशे
षणांतरान्वयोपपत्त्यर्थं पुनः प्रतिसंधानं समाप्ते पुनरुपादानमिति समाप्ते पुनरुपादा
नलक्षणस्य चूडामणीकृतविधुत्ववलयीकृतवासुकित्वविशेषणाभ्यां सह भवत्स्वेशानु
ख्यविशेष्येणाभवनु[?]पायांऽन्वयबोधे जनिते सन्निहितघटितलीलेत्यादिविशेषणांत
रान्वयोपपत्त्यर्थं भवत्स्वपतुल्यविशेष्यस्य पुनः प्रतिसंधाने चूडामणीकृतेत्यादिश्लोके स
त्वादत्र समाप्ते पुनरुपादानं दोष इति चेन्न जनितविवक्षितान्वयबोधस्य विशेषणांतरा
न्वयबोधयित्रया पुनः प्रतिसंधानस्य लक्षणात्वात् चूडामणीकृतेत्यादिश्लोके तु लीलेत्या

विशेषीभव विशेष्यभावं

नं. ५०२५

दि विशेषणानन्वये किमर्थं स्वडामरीहत विधुः किमर्थं वस्तुयी सतयाह किंत्वाकांक्षायाः स
त्वान्निराकांक्षान्वयबोधस्वरूपविवक्षितान्वयबोधाभावात् १
जनितविवक्षितान्वयबोधस्य विशेषस्य विशेषणांतरान्वयबोधयिषया पुनः प्रतिसंधानं स
माप्ति पुनरुपादानम् १ नास्तिकग्रंथः स्वाश्रयपुरुषप्रारीप्सितत्व संबंधेन मंगलवान् स्वप्र
तियोगिचरमवर्णघटितसंबंधेन समाप्तिमत्वात् भारतादिवत् नास्तिकः समवायसंबंधेन मं
गलवान् स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्वसंबंधेन समाप्तिमत्वात् व्यासादिवत् १

स्वसमवायिसमवेतमासमेष्ठ विषयत्वं ग्रंथे चिसद्धां विप्रतिपत्तिर्येस्या
भावः साधी प्रविप्रतिपत्तिः विसद्धाप्रतिपत्तिर्ज्ञानं वा

घटोत्पत्त्याश्रयत्व संबंधेन व्यापारो

हम ४